प्राध्यापक (संस्कृत शिक्षा) प्रतियोगी परीक्षा - 2018
(व्याकरण)

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16

पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

प्रश्न-पत्र पुस्तिका संख्या / Question Paper Booklet No. **5137041**

**Paper Code : 05**

**LSk-02**

परीक्षा दिनांक : 06/08/2020
समय : 2:00 to 5:00

**SUBJECT : Vyakaranam**

**Paper - II**

**समय : 3.00 घण्टे**
**Time : 3.00 Hours**

**अधिकतम अंक : 300**
**Maximum Marks : 300**

**प्रश्न-पत्र पुस्तिका एवं उत्तर पत्रक के पेपर सील/पॉलिथीन बैग को खोलने पर परीक्षार्थी यह सुनिश्चित कर लें कि उसके प्रश्न-पत्र पुस्तिका पर वही प्रश्न-पत्र पुस्तिका संख्या अंकित है जो उत्तर पत्रक पर अंकित है । इसमें कोई भिन्नता हो तो वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । ऐसा न करने पर जिम्मेदारी अभ्यर्थी की होगी ।**

**The candidate should ensure that Question Paper Booklet No. of the Question Paper Booklet and Answer Sheet must be same after opening the Paper Seal / Polythene bag. In case they are different, a candidate must obtain another Question Paper. Candidate himself shall be responsible for ensuring this.**

## परीक्षार्थियों के लिए निर्देश

1. **सभी** प्रश्नों के उत्तर दीजिए ।
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का केवल **एक** ही उत्तर दीजिए ।
4. एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
5. प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले अथवा बबल को उत्तर पत्रक पर **नीले बॉल प्वाइंट पेन** से गहरा करना है ।
6. **OMR** उत्तर पत्रक इस परीक्षा पुस्तिका के अन्दर रखा है । जब आपको परीक्षा पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्र निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा** । गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है । किसी भी प्रश्न से संबंधित गोले या बबल को खाली छोड़ना गलत उत्तर नहीं माना जायेगा ।
8. मोबाइल फोन अथवा इलेक्ट्रॉनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।
9. कृपया अपना रोल नम्बर ओ.एम.आर. पत्रक पर सावधानीपूर्वक सही भरें । गलत अथवा अपूर्ण रोल नम्बर भरने पर **5 अंक** कुल प्राप्तांकों में से काटे जा सकते हैं ।

**चेतावनी** : अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए विविध नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही विभाग ऐसे अभ्यर्थी को भविष्य में होने वाली विभाग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. Answer **all** questions.
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question.
4. If more than one answers are marked, it would be treated as wrong answer.
5. Each question has four alternative responses marked serially as **1, 2, 3, 4**. You have to darken only one circle or bubble indicating the correct answer on the Answer Sheet using **BLUE BALL POINT PEN**.
6. The **OMR** Answer Sheet is inside this Test Booklet. When you are directed to open the Test Booklet, take out the Answer Sheet and fill in the particulars carefully with **blue ball point pen** only.
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question. Leaving all the relevant circles or bubbles of any question blank will not be considered as wrong answer.
8. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.
9. Please correctly fill your Roll Number in O.M.R. Sheet. **5 Marks** can be deducted for filling wrong or incomplete Roll Number.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted. Department may also debar him/her permanently from all future examinations.

**इस परीक्षा पुस्तिका को तब तक न खोलें जब तक कहा न जाए ।**
**Do not open this Test Booklet until you are asked to do so.**

05

1. बैदी इत्यत्र प्रत्ययः अस्ति
(1) ङीप् (2) ङीष्
(3) ङीन् (4) ई

2. "नर्तकी / गौरी" इति प्रातिपदिकेषु 'ङीष्' प्रत्ययविधायकं सूत्रं स्यात् –
(1) नञ्स्नञीकक्
(2) षिद्गौरादिभ्यश्च
(3) पुंयोगादाख्यायाम्
(4) बह्वादिभ्यश्च

3. 'कुरूः' इत्यत्रः ऊङ् प्रत्यय–विधायकं सूत्रमस्ति
(1) पङ्गोश्च
(2) संज्ञायाम्
(3) ऊङुतः
(4) संहितशफलक्षणवामादेश्च

4. 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे' – इति सूत्रेण विभक्तिः भवति –
(1) प्रथमा (2) द्वितीया
(3) तृतीया (4) चतुर्थी

5. "अपादानादिविशेषैर विवक्षितं कारकं कर्मसंज्ञं स्यात्" इत्यर्थे निर्धारितं सूत्रं वर्तते –
(1) कर्मणि द्वितीया
(2) कर्तुरीप्सिततमं कर्म
(3) अकथितश्च
(4) अनभिहिते

6. ग्रामं गच्छन् तृणं स्पृशति इत्यत्र तृणम् इत्यस्य कर्म संज्ञा भवति –
(1) अकथितश्च
(2) अभिनिविशश्च
(3) अधिशीङ्स्थासां कर्म
(4) तथायुक्तं चानीप्सितम्

7. हरिः वैकुण्ठम् अधिवसति इत्यत्र कर्म संज्ञा विधायकं सूत्रमस्ति –
(1) अधिशीङ्स्थासां कर्म
(2) उपान्वध्याङ्वसः
(3) अकथितं च
(4) उपोऽधिके च

8. "येनाङ्गविकारः" इति सूत्रस्योदाहरणमस्ति –
(1) चक्षुषा पश्यति
(2) शिरसा खल्वाटः
(3) पुस्तकेन विद्यार्थी
(4) दण्डेन यतिः

9. रुच्यर्थानां धातूनां योगे का विभक्तिः भवति ?
(1) तृतीया (2) चतुर्थी
(3) पञ्चमी (4) सप्तमी

10. "मातुः निलीयते कृष्णः" इत्यत्र कस्य सूत्रस्य प्रवृत्तिर्भवति ?
(1) वारणार्थानामीप्सितः
(2) क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिकोपः
(3) अन्तर्धौ येना दर्शनमिच्छति
(4) अपादाने पञ्चमी

11. "कर्तृकर्मणोः कृति" इति सूत्रेण विधीयते –
(1) चतुर्थी विभक्तिः (2) पञ्चमी विभक्तिः
(3) षष्ठी विभक्तिः (4) सप्तमी विभक्तिः

12. "यतश्च निर्धारणम्" इत्यनेन सूत्रेण विभक्तिर्भवति –
(1) चतुर्थी / पञ्चमी
(2) पञ्चमी / षष्ठी
(3) षष्ठी / सप्तमी
(4) सप्तमी / सम्बोधनम्

13. गोषु दुह्यमानासु गतः इत्यत्र सप्तमी विभक्तिः भवति
(1) सप्तम्यधिकरणे च
(2) यस्य च भावेन भावलक्षणम्
(3) यतश्चनिर्धारणम्
(4) अधिरीश्वरे

14. पाणिनीयशिक्षानुसारम् अचः कति ?
(1) एकविंशतिः (2) विंशतिः
(3) एकोनविंशतिः (4) पञ्चविंशतिः

15. वर्णानां कति उच्चारण स्थानानि सन्ति ?
(1) दश (2) नव
(3) अष्टौ (4) सप्त

16. मूर्धन्यसंज्ञकाः वर्णाः के सन्ति ?
(1) इ चवर्ग य श
(2) ऋ टवर्ग रेफ,ष
(3) उ,पवर्ग उपध्मानीय
(4) लृ तवर्ग ल स

17. केषां वर्णानामुच्चारणस्थानं नासिका अस्ति ?
(1) अनुस्वारयमानाञ्च (2) स्वराणाम्
(3) अन्तः स्थानाम् (4) ऊष्मणाम्

18. वेदस्य मुखं स्मृतम् –
(1) ज्योतिषम् (2) छन्दः
(3) कल्पः (4) व्याकरणम्

19. भिन्यन्तः इति सूत्रस्य उदाहरणमस्ति
(1) अवनिः, लक्ष्मीः (2) श्रोणिः, शमी
(3) भूमिः, ग्लानिः (4) धनी, युवतिः

20. आपः इमाः अत्र लिङ्गम् अस्ति –
(1) स्त्रीलिङ्गम् (2) पुंलिङ्गम्
(3) नपुंसकलिङ्गम् (4) पुं नपुंसकम्

21. घञबन्तः इति सूत्रस्य उदाहरणं किमस्ति ?
(1) पाकः, त्यागः (2) ग्रन्थः, यत्नः
(3) गुल्फः, मेघः (4) प्रभुः, ईश्वरः

22. रुत्वन्तः शब्दः कस्मिन् लिङ्गे भवति ?
(1) पुंल्लिङ्गे (2) स्त्रीलिङ्गे
(3) नपुंसकलिङ्गे (4) स्त्री नपुंसके

23. "वृक्षः" इत्यत्र केन सूत्रेण पुंल्लिङ्गस्यविधानं भवति ?
(1) नोपधः (2) षोपधः
(3) सोपधः (4) पोपधः

24. द्वन्द्वैकत्वम् इति सूत्रस्य उदाहरण मस्ति
(1) अहिन कुलम् (2) दधिपयसम्
(3) शरच्छायम् (4) पाणिपादम्

25. 'सुमद्रम्' इति समस्तपदे कस्मिन्नर्थे 'सु' इत्यव्ययस्य 'मद्र' शब्देन सह समासोऽभवत् –
(1) सुयोग्यार्थे (2) सौहार्द्रार्थे
(3) समृद्ध्यर्थे (4) सौन्दर्यार्थे

26. 'सप्तगङ्गम्' – सप्तानां गङ्गानां समाहारः इत्यत्र कः समासः ?
(1) द्विगुः (2) तत्पुरुषः
(3) अव्ययीभावः (4) कर्मधारयः

27. उपशरदम् इत्यत्र समासान्त-रच्-प्रत्ययविधायकं सूत्रमस्ति –
(1) अव्ययीभावे शरत् प्रभृतिभ्यः
(2) अनश्च
(3) राजाहः सखिभ्यष्टच्
(4) झयः

28. "द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रेण सिद्धं समस्तपदं स्यात् –
(1) ग्रामगतः (2) दुःखप्राप्तः
(3) नरकपतितः (4) सर्वाणि एतानि

29. "शङ्कुलाखण्डः" समस्तपदं केन सूत्रेण सिद्धम् –
(1) तद्धितार्थोत्तरपदसमाहारे च
(2) तृतीया तत्कृतार्थेन गुणवचनेन
(3) चतुर्थी तदर्थार्थबलिहित सुखरक्षितैः
(4) सर्वैः सूत्रैः

30. "भूतबलिः" इत्यत्र कः समासः ?
(1) द्वितीयातत्पुरूषः (2) तृतीयातत्पुरूषः
(3) चतुर्थीतत्पुरूषः (4) पञ्चमीतत्पुरूषः

31. 'तद्धितार्थोत्तरपद समाहारे च' इति सूत्रस्योदाहरणं वर्तते –
(1) पौर्वशालः (2) अक्षशौण्डः
(3) कुपुरुषः (4) ऊरीकृत्य

32. 'विशेषणं विशेष्येण बहुलम्' इति सूत्रस्योचितम् उदाहरणमस्ति
(1) नीलोत्पलम् (2) घनश्यामः
(3) देवब्राह्मणः (4) शाकपार्थिवः

33. "प्राप्तोदकोग्रामः" इत्यत्र केन सूत्रेण समासो भवति ?
(1) तद्धि तार्थोत्तरपद समाहारे च
(2) अनेकमन्यपदार्थे
(3) स,नपुंसकम्
(4) मयूरव्यंसकादयश्च

34. समाहर द्वन्द्व समासस्य उदाहरणमस्ति –
(1) धवखदिरौ (2) हरिहरौ
(3) संज्ञापरिभाषम् (4) शिवकेशवौ

35. "ऋक्पूरब्धूपथामानक्षे" इति सूत्रेण कः प्रत्ययः भवति ?
(1) अण् प्रत्ययः (2) टच् प्रत्ययः
(3) धञ् प्रत्ययः (4) अ प्रत्ययः

36. "शिवादिभ्योऽण्" इति अपत्याधिकार सूत्रस्य उचितम् उदाहरणम् अस्ति –
(1) पौत्रीयः (2) दैत्यः
(3) गाङ्गः (4) वाशिष्ठः

37. "संस्कृतम्" इति सूत्रेण सिद्धे 'मारीचिकम्' इति शब्दे कः प्रत्ययः ?
(1) ठक् (2) ईकक्
(3) कः (4) फक्

38. 'राजन्यः' इत्यत्र प्रत्ययः अस्ति –
(1) ण्यत् (2) यत्
(3) अण् (4) ण्यः

39. 'काषायम्' इति प्रातिपदिकं केन सूत्रेण सिद्ध्यति ?
(1) तेन रक्तं रागात् (2) साऽस्य देवता
(3) सभायाः य (4) तत्र साधुः

40. "शिवीनां निवासो देशः शैवः" इत्यत्र 'शिवि' शब्दात् प्रत्ययः स्यात् –
(1) अण् (2) अप्
(3) वः (4) न कोऽपि

41. "राष्ट्रियः" इति प्रातिपदिके प्रत्ययः अस्ति –
(1) इय् प्रत्ययः (2) ख-प्रत्यय
(3) यः प्रत्ययः (4) घ-प्रत्ययः

42. "तस्य भावस्त्वतलौ" इति सूत्रेण त्वतलौ प्रत्ययौ कस्मिन्नर्थे भवतः ?
(1) भावार्थे
(2) तत्र भवः इत्यर्थे
(3) अपत्यार्थे
(4) तस्य निवासार्थे

43. "नित्यवीप्सयोः" इति सूत्रस्योदाहरणमस्तिः
(1) भुक्त्वा भुक्त्वा
(2) वृक्षं वृक्षं सिञ्चति
(3) ग्रामो ग्रामो रमणीयः
(4) सर्वाण्येतानि

44. 'दण्डी – दण्डिकः' इत्यत्र प्रत्ययौ स्तः –
(1) इनिठनौ (2) इक्इकौ
(3) घखौ (4) णिजकौ

45. "किंयत्तदो निर्धारणे द्वयोरेकस्य ______"
इति रिक्तस्थाने कः प्रत्ययः स्यात् ?
(1) डतमच् (2) तरब्
(3) डतरच् (4) ईयसुन्

46. बहूनां मध्ये एकस्य निर्धारणे कः प्रत्ययः भवति ?
(1) डतमच् (2) डतरच्
(3) अडच् (4) क्यच्

47. भू धातु – लोटलकारस्य मध्यमपुरुषस्य एकवचने रूपमस्ति
(1) भवतम् (2) भवताम्
(3) भवतात् (4) भवत

48. $\sqrt{\text{अद्}}$ धातोः लिटि प्रथमपुरुषैकवचनस्य रूपं भवति

(1) अद्यात् (2) आदत्

(3) अत्ता (4) आद

49. 'एधिष्यन्ते' इति पदे लकार-पुरुष-वचनानि निर्धारयत -

(1) लङि मध्यम पुरुषैकवचनम्

(2) लटि प्रथम पुरुषैकवचनम्

(3) लृटि – प्रथम पुरुष बहुवचनम्

(4) लुटि – मध्यम पुरुष द्विवचनम्

50. $\sqrt{\text{हु}}$ धातोः शपःस्थाने "जुहोत्यादिभ्यः" इति सूत्रेण किं विधीयते

(1) शः (2) श्लुः

(3) श्नुः (4) णिच्

51. अतिष्ठिपत् इति रूपे स्था+णिच् इति कृते केन सूत्रेण पुगागमः स्यात् -

(1) तिष्ठतेरित्

(2) हेतुमति च

(3) अर्तिहरीब्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ

(4) सन्यङो :

52. "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" इति सूत्रेण कस्मिन्नर्थे यङ्प्रत्ययः स्यात् ?

(1) पौनः पुन्ये भृशार्थे च

(2) इच्छार्थे

(3) भावकर्मार्थे

(4) उपमार्थे

53. 'पुत्रीयति' इति सिद्ध्यर्थे कः प्रत्ययः भवति ?

(1) यङ् (2) यङ्लुक्

(3) क्यच् (4) क्यप्

54. "विपराभ्यां जेः" इति सूत्रेण किं रूपं निष्पन्नं भवति ?

(1) व्यतिजयते (2) विजयते

(3) अतिजयते (4) एतानि सर्वाणि

55. "समवप्रविभ्यः स्थः" इति सूत्रं कुत्र न प्रवर्तते ?

(1) सन्तिष्ठते (2) प्रतिष्ठते

(3) अवतिष्ठते (4) उत्तिष्ठति

56. 'पिपठिषति' इति धातुरूपं कस्मात् धातोः निष्पन्नम् अस्ति

(1) णिजन्तधातोः (2) यङन्तधातोः

(3) सनन्तधातोः (4) यङ्लुङन्तधातोः

57. "रीगृदुपधस्य च" इति सूत्रस्योदाहरणमस्ति

(1) नृत्यन्ते (2) नरीनृत्यते

(3) वरीयते (4) वाव्रज्यते

58. 'अचो यत्' इति सूत्रेण रूपं सिद्ध्यति -

(1) चेयम् (2) शिष्यम्

(3) इत्यः (4) विहस्य

59. 'कार्यम्, हार्यम्, धार्यम्' इत्येतेषु कः प्रत्ययोऽस्ति

(1) यत् (2) ण्यत्

(3) क्यप् (4) ल्यप्

60. 'जनम् अर्दयति इति जनार्दनः' इत्यत्र प्रत्ययोऽस्ति -

(1) ल्युः (2) ल्युट्

(3) ल्यप् (4) लुक्

61. गोदः, धनदः इत्यत्रः कः प्रत्ययः ?

(1) अण् (2) अः

(3) कः (4) ण्यः

62. "अरुर्द्विषदजन्तस्य....." इत्यत्र रिक्तस्थानं पूरयत -

(1) अम् (2) टित्

(3) मित् (4) मुम्

63. अप्रथमासमानाधिकरणे लटः स्थाने कौ प्रत्ययौ भवतः ?

(1) क्तक्तवतु (2) शतृशानचौ

(3) क्यपूक्यचौ (4) तव्यानीयरौ

64. 'प्रकृत्य' अत्र कः प्रत्ययः वर्तते –
(1) त्यः (2) क्यप्
(3) ल्यप् (4) न कोऽपि

65. "आभीक्ष्ण्ये णमुल् च" इत्यत्र णमुलतिरिक्तस्य कस्य प्रत्ययस्य प्रवृत्तिर्भवति –
(1) क्त्वा (2) ल्युट्
(3) क्त (4) यत्

66. क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोः कौ प्रत्ययौ स्तः ?
(1) ण्वुल्तृचौ (2) तुमुन्ण्वुलौ
(3) तव्यानीयरौ (4) ण्यत्यतौ

67. 'हलश्च' इति सूत्रेण घञ् प्रत्यये कृते सति रूपं सिद्ध्यति –
(1) पाकीकः (2) हसितम्
(3) रामः (4) पुत्रः

68. $\sqrt{\text{रुध्}}$ धातो रात्मनेपदे विधिलिङि प्रथमपुरुषैकवचने रूपं स्यात्
(1) रून्धीत (2) रून्धाते
(3) अरूधम् (4) रून्धे

69. "तनादिकृञ्भ्यः ______" इति रिक्तस्थाने कः प्रत्ययः स्यात् ?
(1) श्नुः (2) उः
(3) श्नम् (4) श्ना

70. 'सम्परिभ्यां करोतौ भूषणे' इति सूत्रेण किं क्रियते
(1) प्रत्ययः (2) आगमः
(3) आदेशः (4) लकारः

71. 'प्वादीनां ह्रस्वः' इति सूत्रं कदा प्रवर्तते ?
(1) कितिपरे (2) टितिपरे
(3) शितिपरे (4) णितिपरे

72. 'ग्रहोऽलिटि दीर्घः' इति सूत्रं न प्रवर्तते ?
(1) लिटि परे (2) लुटि परे
(3) लृटि परे (4) लृङि परे

73. सत्यापपाश... चुरादिभ्यो स्वार्थे कः प्रत्ययः स्यात् ?
(1) सन् (2) शप्
(3) णिच् (4) शः

74. 'अनुकरोति' इति पदं 'अनुपराभ्यां कृञः' इति सूत्रेण कस्याः प्रक्रियायाः फलमस्ति ?
(1) परस्मैपदप्रक्रियायाः
(2) भावकर्मप्रक्रियायाः
(3) आत्मनेपदप्रक्रियायाः
(4) यङ्लुङन्तप्रक्रियायाः

75. "ह य व र ट् (अत्र) ______" इत्यत्र प्रौढमनोमानुसारं रिक्तस्थानपूर्तिं कुरुतः –
(1) हकारोपदेशः (2) आकारोपदेशः
(3) यकारोपदेशः (4) लकारोपदेशः

76. "ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः ।
सिद्धान्तकौमुदीव्याख्यां कुर्मः ।।"
इत्यत्रेयं व्याख्या केन नाम्ना कृता ?
(1) बालमनोरमा (2) लघुमञ्जूषा
(3) प्रौढमनोरमा (4) परमलघूमञ्जूषा

77. वैयाकरणभट्टोजीदीक्षितानुसारं – "यद्यत्र कार्यासिद्धत्तम् इष्येत, तर्हि पूर्वत्रासिद्धमिति 'मनोरथः' इत्यादावुत्वं न स्यात्, परत्वात् ______ इत्यस्य प्रसंगात्"
इत्यत्र रिक्तस्थाने कस्य सूत्रस्य प्रवृत्तिरसिद्धा कथिता ?
(1) रात्सस्य (2) राल्लोपः
(3) रोऽसुपि (4) रोरि

78. "इदुतौ उपद्ये यस्य समुदायस्य तस्यावयवो यो विसर्जनीय इति वैयाधिकरण्येन सम्बन्धः" इति रूपेण प्रौढमनोरमायां कस्य सूत्रस्य व्याख्या कृता अस्ति ?
(1) इदुदुपधस्य चाप्रत्ययस्य
(2) अणुदित सवर्णस्य चाप्रत्ययस्य
(3) प्रत्ययोत्तरपदयोश्च
(4) प्रत्ययः

79. भट्टोजीदीक्षितेन "प्रौढमनोरमा" इति नाम्नी व्याख्या कस्य ग्रन्थस्य कृते लिखिता ?
(1) शब्दकौस्तुभस्य
(2) सिद्धान्तकौमुद्याः
(3) वेदभाष्यसारस्य
(4) न कस्याऽपि

80. "येनोच्चारितेन सास्नालाङ्गूल ककुद खुर विषाणिनां _______ भवति सः शब्दः" इति महाभाष्यवाक्यं पूरयत –
(1) सम्मेलनम् (2) संकोचम्
(3) ह्रसो (4) सम्प्रत्ययो

81. "...स्वरतो वर्णतो वा, मिथ्या प्रयुक्तो न तमर्थमाह" इत्यनेन किं परिभाषितम् ?
(1) दुष्टः शब्दः (2) अविद्वांसः
(3) विभक्तिः (4) वाचा

82. 'वाक्यपदीयम्' इति ग्रन्थः केन विरचितोऽस्ति –
(1) महर्षिपतञ्जलिना (2) महर्षिपाणिनिना
(3) महर्षिभर्तृहरिणा (4) महर्षि दीक्षितेन

83. 'वाक्यपदीयम्' इत्यनुसारम् अनादिनिधनेन ब्रह्मरूपेण कि मुक्तम् ?
(1) रसतत्त्वम् (2) शब्दतत्त्वम्
(3) विवर्तः (4) कालः

84. वाक्यपदीयस्य प्रथमकाण्डस्य किन्नाम वर्तते ?
(1) वाक्यकाण्डम्
(2) ब्रह्मकाण्डम्
(3) प्रकीर्णकाण्डम्
(4) आगमकाण्डम्

85. श्रीनागेशभट्टेन विरचिताया परमलघु रचनायाः नाम अस्ति –
(1) परमलघुमञ्जूषा
(2) महाभाष्यप्रदीपोद्योतः
(3) परिभाषेन्दुशेखरः
(4) एताः सर्वाः

86. "नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधीः ।
_______ सुखबोधाय परिभाषेन्दुशेखरम् ।।"
इत्यत्र केषां सुखबोधाय अस्य रचना कृता ?
(1) विदुषाम् (2) बालानाम्
(3) यूनाम् (4) मूर्खाणाम्

87. परमलघुमञ्जूषानुसारं वर्ण–पद–वाक्यरूपस्फोटस्य संकलनया कतिभेदाः कथिताः ?
(1) चत्वारि (2) षोडश
(3) सप्त (4) अष्टौ

88. "सा च _______ त्रिधा–शक्तिर्लक्षणाव्यञ्जना च" इत्यत्र त्रिधारूपेण का उक्ता ? (परमलघुमञ्जूषानुसारम्)
(1) शब्दशक्तिः (2) अर्थः
(3) वृत्तिः (4) ज्ञानम्

89. फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ।।
इति रूपेण धात्वर्थः कस्मिन् व्याकरणदर्शनग्रन्थे विवेचितः ?
(1) महाभाष्ये
(2) वैयाकरभूषणसारे
(3) परिभाषेन्दुशेखरे
(4) वाक्यपदीये

90. अधः उक्तेषु बिन्दुषु मनोविज्ञानस्य शाखा नास्ति ?
(1) सामान्यमनोविज्ञानम्
(2) शिक्षामनोविज्ञानम्
(3) पशुमनोविज्ञानम्
(4) आर्थिकमनोविज्ञानम्

91. व्यवस्थित व्यवहार सिद्धान्तस्य प्रतिपादकः कः ?
(1) ब्रूनर महोदयः
(2) वुडवर्थ महोदयः
(3) हल महोदयः
(4) स्कीनर महोदयः

92. मनोवैज्ञानिकेन स्किनरेण शिक्षामनोविज्ञानोद्देश्यं कतिभागेषु विभक्तं कृतम् ?
(1) द्वे (सामान्यविशिष्टे)
(2) एकम् (सामान्यम्)
(3) त्रीणि (मानवकर्माणि)
(4) न किमपि

93. "मनोविज्ञानं मानवव्यवहारस्य अध्ययनमस्ति" इति कस्य कथनमस्ति ?
(1) कुप्पूस्वामी (2) पिल्सबरी
(3) स्काउटः (4) यूलिचः

94. सूचना-एकत्रकरणाय कतमो विधिः समुचितः कथितः ?
(1) संश्लेषणविधिः (2) उपचारात्मकविधिः
(3) विश्लेषणविधिः (4) एते सर्वे

95. शिक्षामनोविज्ञानेन कीदृशी शिक्षा प्रदीयते ?
(1) बालकेन्द्रिता शिक्षा
(2) क्रियान्वयन शिक्षा
(3) विषय-वस्तुकेन्द्रिता शिक्षा
(4) अध्यापककेन्द्रिता शिक्षा

96. अधः उक्तेषु तत्त्वेषु प्रतिमानस्य आधारभूततत्त्वरूपेण किं परिगण्यते –
(1) उद्देश्यम् (2) संरचना
(3) मूल्यांकनम् (4) एते सर्वे

97. 'ज्ञानम्' इति कस्य परिणामोऽस्ति –
(1) अधिगमप्रोत्साहनस्य
(2) अधिगमहतोत्साहनस्य
(3) अधिगमावरोधस्य
(4) अधिगमस्थैर्यस्य

98. एतासु किशोरावस्थाया विशेषता नास्ति –
(1) अतिभावुकता (2) दिवास्वप्नः
(3) वैराग्यम् (4) विद्रोहीव्यवहारः

99. शिक्षामनोविज्ञानयोः संयोजकं तत्त्वं मन्यते
(1) मानवव्यवहारः (2) शिक्षाशास्त्रम्
(3) इतिहाससंस्कृती (4) दर्शनशास्त्रम्

100. व्यावहारिकमनोविज्ञाने अधः उक्तं न परिगण्यते
(1) शिक्षा (2) चिकित्सा
(3) विधिः (4) सामान्यचिन्तनम्

101. अधः उक्ता प्रवृत्तिः पलायनस्य सूचिकाऽस्तिः
(1) क्रोधः (2) भयम्
(3) स्नेहः (4) वात्सल्यम्

102. अधिगमस्य प्रभावककारकाणि सन्ति
(1) समुचित-वातावरणम्
(2) अभिप्रेरणम्
(3) परिपक्वता
(4) सर्वे

103. "व्यवहारेण व्यवहारे परिवर्तनस्य क्रियायाः नाम 'अधिगमः' " इति केन विचारकेण स्वीकृतम्
(1) गिलफोर्डेन (2) ब्रूनरेण
(3) फ्रायडेन (4) पॉवलवेन

104. 'थार्नडाइक' इति शिक्षामनोविज्ञानवेत्तानुसारं बुद्धेः प्रकारेषु अयं प्रकारः न परिगण्यते –
(1) मूर्तबुद्धिः
(2) अमूर्तबुद्धिः
(3) सामाजिकबुद्धिः
(4) स्नेहबुद्धिः

105. "बुद्धि-लब्धिः" इति प्रक्रियानुसारं बालकस्य परिमापनं क्रियते । एतत्प्रकारेण बालकाः स्वीकृताः –
(1) औसतबालकाः
(2) मंद-बुद्धिबालकाः
(3) प्रखरबुद्धिबालकाः
(4) एते सर्वप्रकारकाः

106. 'लिग्वाफोन' इति यन्त्रमस्ति
(1) श्रव्यसामग्री
(2) दृश्यसामग्री
(3) दृश्य-श्रव्य सामग्री
(4) न किमपि

107. 'कम्प्यूटर-वायरस' इति किमस्ति ?
(1) हार्डवेयरः (2) सॉफ्टवेयरः
(3) बैक्टीरिया (4) न किमपि

108. 'संगणकसहायकानुदेशनम्' (CAI) किन्नाम्ना कथ्यते ?
(1) इलैक्ट्रोनिक ब्रेन
(2) इलैक्ट्रोनिक मैमोरी
(3) इलैक्ट्रोनिक बुक
(4) इलैक्ट्रोनिक जर्नल

109. संगणकम् (कम्प्यूटर) इति कीदृशी सामग्री वर्तते ?
(1) दृश्य सामग्री
(2) श्रव्य सामग्री
(3) दृश्य-श्रव्य सामग्री
(4) स्पर्श सामग्री

110. मस्तिष्के नवीनज्ञाननिर्माणप्रक्रिया किन्नाम्ना कथ्यते ?
(1) ज्ञानम् (2) संज्ञानम्
(3) संक्रिया (4) न किमपि

111. 'संगणक हार्डवेयर' इति व्यवस्थाया अङ्गमस्तिः -
(1) इन्पुट डिवाइसम्
(2) आउटपुट डिवाइसम्
(3) मैमोरी यूनिटम्
(4) सर्वाण्येतानि

112. कस्यामवस्थायां बालकः जटिलाध्यात्मिक प्रश्नेषु डोलायते ?
(1) बाल्यावस्थायाम्
(2) किशोरावस्थायाम्
(3) प्रौढावस्थायाम्
(4) सर्वासु

113. शिक्षामनोवैज्ञानिकेन पॉवलवेन कस्य सिद्धान्तस्य प्रतिपादनम् कृतम् ?
(1) सम्बद्धतायाः
(2) सम्बद्धस्यव्यवहारस्य च
(3) परम्परागतसम्बद्धतायाः (सम्बद्धानुक्रियायाः)
(4) एतेषाम् सर्वेषाम्

114. बुद्धेः सिद्धान्तेषु द्वि-तत्त्व सिद्धान्तस्य प्रवर्तकः कः ?
(1) थॉर्नडाईक महोदय ।
(2) स्पीयरमैन महोदयः ।
(3) थर्स्टन महोदयः ।
(4) क्रो महोदयः ।

115. अधोलिखितेषु संप्रेषण-प्रक्रियायाः तत्त्वं नास्ति ?
(1) एनकोडिंग (2) डीकोडिंग
(3) पृष्ठपोषणम् (4) संगणकम्

116. संप्रेषणस्य मुद्रितमाध्यमो अस्ति
(1) समाचारपत्रम् (2) दूरदर्शनम्
(3) आकाशवाणी (4) संगणकम्

117. उत्कृष्टबुद्धि बालकस्य बुद्धिलब्धिः वर्तते
(1) 70 तः 80 (2) 120 तः 140
(3) 110 तः 120 (4) 90 तः 110

118. शिक्षण प्रतिमानानां प्रकाराः मार्स वील - ब्रूस जॉयसी महोदयाभ्यां कति स्वीकृताः ?
(1) त्रयः (2) चत्वारः
(3) पञ्च (4) सप्त

119. सूचनासंप्रेषणतकनीकीमध्ये 'सी.ए.एल.' (CAL) इति किं तात्पर्यम् ?
(1) संगणकसहायताप्राप्ताधिगमः ।
(2) संगणकप्रबंधितानुदेशनम् ।
(3) उपगमानुदेशनम् ।
(4) संगणकसहायता प्राप्तानुदेशनम् ।

**120.** पदसंज्ञाविधायकं सूत्रम् अस्ति
(1) सुऽनपुंसकस्य
(2) सुप्तिङन्तं पदम्
(3) कृत्तद्धित समासाश्च
(4) इकोगुणवृद्धिः

**121.** "आदिरन्त्येन सहेता" इति सूत्रेण किं भवति ?
(1) संहिता (2) इत्कार्यम्
(3) अन्वयः (4) प्रत्याहारविधानम्

**122.** "ताल्वादिषु समागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽच् _______ स्यात्" इति रिक्तस्थानपूर्तिं कुरुत –
(1) उदात्तसंज्ञः (2) अनुदात्तसंज्ञः
(3) स्वरितसंज्ञः (4) पदसंज्ञः

**123.** "अ इ उ" एषां वर्णानां प्रत्येकं कति भेदाः सन्ति ?
(1) द्वादश (2) अष्टादश
(3) चतुर्दश (4) नव

**124.** ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः कीदृशः संज्ञः स्यात् ?
(1) उदात्तसंज्ञः (2) लोपसंज्ञः
(3) सवर्णसंज्ञः (4) मिथःसंज्ञः

**125.** 'लृतुलसानाम्' एषां वर्णानाम् उच्चारण स्थानं किम् ?
(1) दन्ताः (2) कण्ठतालुः
(3) कण्ठः (4) आनुनासिकः

**126.** गुणसंज्ञाविधायकं सूत्रम् अस्ति
(1) आद् गुणः (2) ओर्गुणः
(3) अतो गुणे (4) अदेङ्गुणः

**127.** "न वेति _____" (निषेध विकल्पयोः ...) का संज्ञा ?
(1) उपसर्ग संज्ञा (2) निपात संज्ञा
(3) विभाषा संज्ञा (4) न कापि

**128.** सुधी + उपास्यः = सु ध् ध् य् + उपास्यः इत्यत्र धकारस्य द्वित्वं केन सूत्रेण भवति ?
(1) अलोऽन्त्यस्य
(2) लिट् च
(3) लिटिधातोरनभ्यासस्य
(4) अनचि च

**129.** "अचो रहाभ्यां द्वे" इति सूत्रस्योचितमुदाहरणमस्ति
(1) हर्य्यनुभवः (2) इन्द्रः
(3) राष्ट्रम् (4) अर्क्कः

**130.** कृष्ण + ऋद्धिः इत्यस्य सन्धिरूपं भवति
(1) कर्ष्णृद्धिः (2) कृष्णाद्धिः
(3) कृष्णृद्धिः (4) कृष्णर्द्धिः

**131.** रामस् + चिनोति इत्यस्य संधिस्वरूपं किम् ?
(1) रामः चिनोति (2) रामस्चिनोति
(3) रामश्चिनोति (4) रामष्चिनोति

**132.** तल्लयः – तद् + लयः अज परसवर्णः भवति ।
(1) झयो होऽन्यतरस्याम्
(2) तोर्लि
(3) खरि च
(4) यरोऽनुनासिकेऽनुनासिको वा

**133.** ङमोह्रस्वादचि ङमुण्नित्यम्' इति सूत्रस्योदाहरणमस्ति,
(1) षट्त्सन्तः (2) सुगण् षष्ठः
(3) सन्नच्युतः (4) सञ्शम्भुः

**134.** शिवच्छाया इत्यत्र आगमः भवति
(1) धुट् (2) कुक्
(3) टुक् (4) तुक्

**135.** देवा इह–देवायिह इत्यत्र रोर्यदिशः केन सूत्रेण भवति
(1) अतोरोरप्लुतादप्लुते
(2) हशि च
(3) भोभगोअघोऽपूर्वस्य योऽशि
(4) रोऽसुपि

136. "अर्थवद धातुरप्रत्ययः ______" इति सूत्रस्य रिक्तस्थानपूर्तिं कुरुत –

(1) प्रथमा (2) प्रातिपदिकम्
(3) धातुः (4) प्रत्ययः

137. 'हरिषु' इति पदे सकारस्य षत्वादेशविधायकं सूत्रमस्ति

(1) अट्कुत्वाङ्नुम्व्यवायेऽपि
(2) स्तोः श्चुनाश्चुः
(3) आदेशप्रत्यययोः
(4) ष्टुना ष्टुः

138. श्रियै इत्यत्र कः सुप् प्रत्ययः ?

(1) श्री + टा (2) श्री + ङे
(3) श्री + ङसि (4) श्री + आम्

139. क्रोष्ट्री इत्यत्र ङीप् प्रत्ययः भवति

(1) वर्णादनुदात्तोपधात्तोनः
(2) षिद् गौरादिभ्यश्च
(3) मनोरौ वा
(4) ऋन्नेभ्यो ङीप्

140. लिड्भ्याम् इत्यत्र हस्य त्वं भवति

(1) सावनडुहः (2) होढः
(3) दादेधीतोर्धः (4) वाह ऊठ्

141. त्वयि मयि इति रूपमस्ति

(1) चतुर्थी–एकवचनस्य
(2) तृतीया–बहुवचनस्य
(3) सप्तमी–एकवचनस्य
(4) द्वितीया–एकवचनस्य

142. वाक्षु इत्यस्य प्रकृतिप्रत्ययौस्तः

(1) वाच् + सु (2) वाच् + सुप्
(3) वाक् + सुप् (4) वाग् + सुप्

143. 'अदस्' इति सर्वनाम्नः नपुंसकस्य द्वितीया – द्विवचनस्यरूपमास्ति –

(1) असौ (2) अमुम्
(3) अमू (4) अमूनि

144. अव्ययसंज्ञाविधायकं सूत्रमस्ति

(1) स्वरादिनिपातम् अव्ययम्
(2) सुप्तिङन्तम् पदम्
(3) कृत्तद्धित समासाश्च
(4) अव्ययादाप्सुपः

145. स्मारं स्मारम् इत्यत्र अव्ययसंज्ञा भवति

(1) अव्ययीभावश्च
(2) कृन्मेजन्तः
(3) स्वरादिनिपातमव्ययम्
(4) क्त्वातोसुन्कसुनः

146. कृत्वा इत्यत्र केन सूत्रेण अव्ययसंज्ञा भवति ?

(1) अव्ययीभावश्च
(2) स्वरादिनिपातमव्ययम्
(3) कृन्मेजन्तः
(4) क्त्वातोसुन्कसुनः

147. सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु ।– सर्वेषु च वचनेषु यन्न व्येति तद्.... इति रूपेण किं परिभाषितम् ?

(1) शब्दम् (2) प्रत्ययम्
(3) अव्ययम् (4) एतानि सर्वाणि

148. "अधिहरि" इति समस्तपदे केन सूत्रेण अव्ययसंज्ञा भवति ?

(1) नाऽव्ययीभावात्
(2) अव्ययीभावश्च
(3) अव्ययीभावे चाकाले
(4) न केनापि

149. स्त्रीत्व विवक्षायाम् "अजाद्यतष्टाप्" इति सूत्रेण सिद्धः शब्दः अस्ति –

(1) मूषिका (2) सखा
(3) भविता (4) सर्वे

150. "उगितश्च" इति सूत्रेण कस्य प्रत्ययस्य विधानं भवति ?

(1) ईन् (2) ङीप्
(3) ङीष् (4) ङीन्